कमलापत्यष्टकम्

{॥ कमलापत्यष्टकम् ॥}

भुजगतल्पगतं घनसुन्दरं गरुडवाहनमम्बुजलोचनम् ।
नलिनचक्रगदाकरमव्ययं भजत रे मनुजाः कमलापतिम् ॥ १॥

अलिकुलासितकोमलकुन्तलं विमलपीतदुकूलमनोहरम् ।
जलधिजाश्रितवामकलेवरं भजत रे मनुजाः कमलापतिम् ॥ २॥

किमु जपैश्च तपोभिरुताध्वरैरपि किमुत्तमतीर्थनिषेवणैः ।
किमुत शास्त्रकदंबविलोकनैः भजत रे मनुजाः कमलापतिम् ॥ ३॥

मनुजदेहमिमं भुवि दुर्लभं समधिगम्य सुरैरपि वाञ्छितम् ।
विषयलंपटतामपहाय वै भजत रे मनुजाः कमलापतिम् ॥ ४॥

न वनिता न सुतो न सहोदरो न हि पिता जननी न च बान्धवाः ।
व्रजति साकमनेन जनेन वै भजत रे मनुजाः कमलापतिम् ॥ ५॥

सकलमेव चलं सचराचरं जगदिदं सुतरां धनयौवनम् ।
समवलोक्य विवेकदृशा द्रुतं भजत रे मनुजाः कमलापतिम् ॥ ६॥

विविधरोगयुतं क्षणभङ्गुरं परवशं नवमार्गमलाकुलम् ।

Stotram Digitalized By Sanskritdocuments.org

परिनिरीक्ष्य शरीरमिदं स्वकं भजत रे मनुजाः कमलापतिम् ॥ ७॥

मुनिवरैरनिशं हृदि भावितं शिवविरिञ्चिमहेन्द्रनुतं सदा ।

मरणजन्मजराभयमोचनं भजत रे मनुजाः कमलापतिम् ॥ ८॥

हरिपदाष्टकमेतदनुत्तमं परमहंसजनेन समीरितम् ।

पठति यस्तु समाहितचेतसा व्रजति विष्णुपदं स नरो ध्रुवं ॥ ९॥

इति श्रीमत्परमहंसस्वामिब्रह्मानन्दविरचितं कमलापत्यष्टकं समाप्तं॥

Proofread by PSA EASWARAN psaeaswaran at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Kamalapatya Ashtakam Lyrics in Devanagari PDF
% File name : kamalApatyaShTakam.itx
% Category : aShTaka
% Location : doc_vishhnu
% Author : Swami Barhmananda
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Proofread by : PSA Easwaran psaeaswaran at gmail.com
% Latest update : June 13, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org

%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website